निवेदयन्। वोढुमर्हति गोपस्तं विनयञ्चैव राजनि" इति। तत्कृवादिकम्। पशूनां दैवात् मरणे पालकस्य दोषाभावज्ञानोपायमाह व्यासः "मृतेषु च विशुद्धः स्याद् बालशृङ्गादिदर्शनात्"। आदिशब्देन कर्णादीनां ग्रहणम्। तथा च मनुः "कर्णौ चर्म च बालांश्च वस्तिं स्नायुञ्च रोचनाम्। पशुषु स्वामिनां दद्यान्मृतेष्वङ्कानि दर्शयेत्" इति। अङ्कादि दर्शयेदिति क्वचित् पाठः। अङ्कः शृङ्गकर्णादिरूपचिह्नम्। आदिशब्दः साक्षिसंग्रहार्थः। पशुषु मृतेष्वङ्कादिकं स्वामिने दर्शयेत्। रोचनादिकं यत्प्रयोजनं तत् तस्मै दद्यादित्यर्थः। नष्टगवादिदानञ्च तत्स्वामिने मूल्यद्वारेण ज्ञातव्यम्। अतएव विष्णुः "दिवा पशूनां वृकाद्युपघाते पाले त्वनायति पालकदोषो विनष्टपशूनां मूल्यं स्वामिने दद्यादिति"। अनायति अनागच्छति। विनष्टद्रव्यप्रमाणमाह याज्ञवल्क्यः "पालदोषविनाशे तु पाले दण्डो विधीयते। अर्द्धत्रयोदशपणः स्वामिनो द्रव्यमेव च" इति। अर्द्धत्रयोदशपणः अर्द्धरहितत्रयोदशपणः। सार्द्धद्वादशपण इति यावत्। उत्तरपदलोपी कर्मधारयः। यत्तु केनचिदर्द्धाधिकत्रयोदशपणो दण्ड इति व्याख्यातं तत् सार्द्धद्विमात्रादिषु अर्द्धत्रिमात्रादि महाभाष्यकारशब्दप्रयोगदर्शनादुपेक्ष्यम्। पालदोषमाह मनुः "अजाविके तु संरुद्धे वृकैः पाले त्वनायति। यां प्रसह्य वृको हन्यात् पाले तत् किल्विषं भवेत्" इति। अनायति उपद्रवनिवारणाय अनागच्छतीत्यर्थः। याम् अजाविकजातीयाम्। सुगमस्थलस्यविषयमेतत्। दुर्गमस्थलस्यविषये त्वाह स एव "तासाञ्चेदवरुद्धानां चरन्तीनां मिथो वने। यामुत्प्लुत्य वृको हन्यान्न पालस्तत्र किल्विषी" इति। अवरुद्धानां पालकेन स्थापितानामित्यर्थः। गवादिप्रचारणार्थं भूमिमाह याज्ञवल्क्यः "ग्राम्येच्छया गोप्रचारो भूमीराजवशेन वा"। ग्राम्येच्छया ग्रामीणजनवशेन राजेच्छया वा। गोप्रचारो गवां तृणादिभक्षणार्थं कियानपि भूभागोऽकृष्टः परिकल्पनीय इत्यर्थः। गवां स्थानासनसौकर्य्याय ग्रामक्षेत्रयोरन्तरमाह स एव "धनुःशतपरीणाहो ग्रामक्षेत्रान्तरं भवेत्। द्विशते खर्वटस्य स्यान्नगरस्य चतुःशतम्" इति। परीणाहशब्देनात्र सर्वासु दिक्षु अनुप्रशस्यस्थलं गृह्यते। एतादृशं धनुःशतं परिमितं ग्रामक्षेत्रयोरन्तरं कार्य्यम्। खर्वटस्य शतद्वयपरिमितमित्यर्थः। खर्वटः अनेककारुकर्षीवलयुक्तो ग्राम इति मदनरत्ने। माधवाचार्य्यैस्तु प्रचुरकण्टकमल्लानो ग्राम इति व्याख्यातम्। तत्र शस्योत्पत्तेः प्रागेवावरणं कार्य्यमित्याह कात्यायनः "अजातेष्वेव शस्येषु कुर्य्यादावरणं महत्। दुःखेन विनिवार्य्यन्ते लब्धस्वादरसा मृगाः" इति। एवं पशुनिवारणार्थं कृतेऽप्यावरणे तदतिक्रम्य पशुभिः शस्यादिविनाशे कृते कर्त्तव्यमाह मनुः "पथिक्षेत्रे परिवृते ग्रामान्तीयेऽथ वा पुनः। स पालः शतदण्डार्हो विपालं वारयेत् पशुम्" इति। पथिक्षेत्रे मार्गसमीपे क्षेत्रे। ग्रामान्तीये ग्रामसमीपवर्त्तिनि। सपालः पशुः पणशतदण्डार्हः तत्पशुपालः पणशतं दण्डनीय इत्यर्थः। अयञ्च दण्डः पशुपालने समर्थेन सता पशावनिवार्य्यमाणे वेदितव्यः। अतएव नारदः "उत्क्रम्य तु वृतिं यः स्याच्छस्यघातो गवादिभिः। पालः शास्यो भवेत् तत्र न चेच्छक्तो निवारयेत्" इति। आवरणाभावेनापरिहार्य्ये शस्योपघातेऽपि न पालस्य दण्डः। तथा च मनुः "तत्रापरिवृतं धान्यं विहिंस्युः पशवो यदि। न तत्र प्रणयेद्दण्डं नृपतिः पशुरक्षिणाम्" इति। अनेनावृतक्षेत्रशस्योपघाते पशुरक्षिणां दण्ड इत्यर्थादुक्तं भवति। अदीर्घकालप्रचारविषयमेतत्। दीर्घकालप्रचारे तु अपरिवृतेऽपि पशुपालो दण्डार्हो भवति। अतएवाल्पकालप्रचारे दोषाभावं दर्शयति विष्णुः "पथि ग्रामविवीतान्ते न दोषोऽल्पकालमिति"। पशुविशेषे दण्डपरिमाणमाह याज्ञवल्क्यः "माषानष्टौ तु महिषी शस्यघातस्य कारिणी। दण्डनीया तदर्द्धं तु गौस्तदर्द्धमजाविकम्। भक्षयित्वोपविष्टानां यथोक्ताद्द्विगुणो दमः। सममेषां विवीतेऽपि खरोष्ट्रं महिषीसमम्" इति। परशस्यघातकारिण्या महिष्याः स्वामी अष्टौ माषान् दण्ड्यः। गोः स्वामी चतुरः। छागस्वामी मेषस्वामी च द्वौ। एतेषां पशूनां शस्यभक्षणादारभ्य तत्रैव उपविष्टानां स्वामी यथोक्तदण्डाद् द्विगुणं ग्राह्यः। विवीतस्थतृणाद्युपघातेऽपि शस्योपघातवद्दण्डनीयः। खरस्वाम्युष्ट्रस्वामी च महिषीस्वामिवद्दण्डनीयः। अत्र पशुस्वामिनो दण्ड इत्यभिधातव्ये महिष्यादिग्रहणं प्रतिपशुदण्डप्राप्त्यर्थम्। भक्षयित्वोपविष्टवत्साविषये यथोक्ताच्चतुर्गुणो दण्डः। तथा च स्मृत्यन्तरम् "वसतां द्विगुणः प्रोक्तः सवत्सानां चतुर्गुणः" इति। अत्रापराधानुसारेण दण्डनार्थं ताम्रिकमाषो ग्राह्यः न पुनः